শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী রঙ্গনাথ স্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রী রঙ্গনাথ স্তোত্রম্॥

নমঃ শ্রীরঙ্গনাথায নমঃ শ্রীরঙ্গশাযিনে।
নমঃ শ্রীরঙ্গদেৱায শ্রীনিৱাসায তে নমঃ॥ **1**॥

নমো ভগৱতে তুভ্যং ৱাসুদেৱায তে নমঃ।
সঙ্ঘর্ষণায প্রদ্যুম্নায অনিরুদ্ধায তে নমঃ॥ **2**॥

পুরুষায নমস্তুভ্যং অচ্যুতায পরায চ।
ৱাসুদেৱায তারায নমঃ শ্রীরঙ্গশাযিনে॥ **3**॥

কেশৱায নমস্তেঽস্তু নমো নারাযণায চ।
মাধৱায নমস্তুভ্যং গোৱিন্দায চ তে নমঃ॥ **4**॥

ওং নমো ৱিষ্ণুৱে দেৱ মধুসূদন তে নমঃ।
ত্রিৱিক্রম নমস্তেঽস্তু নমস্তে ৱামনায চ॥ **5**॥

শ্রীধরায নমস্তুভ্যং হৃষীকেশ নমোঽস্তু তে।
নমোঽস্তু পদ্মনাভায নমো দামোদরায চ॥ **6**॥

মৎস্যকূর্মৱরাহায হংসাশ্ৱশিরসে নমঃ।
নমোঽস্তু জামদগ্ন্যায দত্তায কপিলায চ॥ **7**॥

ৱেদৱ্যাসায বুদ্ধায নৃসিংহায তে নমঃ।
রামলক্ষ্মণশত্রুঘ্ন ভরতাত্মন্ নমোঽস্তু তে॥ **8**॥

কৃষ্ণায বলভদ্রায নমস্সাংভায কল্কিনে।
অনন্তানন্দশযনে পুরাণ পুরুষোত্তম।
রঙ্গনাথ জগন্নাথ নাথ তুভ্যং নমো নমঃ ॥ **9** ॥

॥ শ্রী রঙ্গনাথ স্তোত্রং সমাপ্তম্ ॥